# VYAS PANCHANG

ज्योतिष-पंचांग-पूजा पाठ एवं ज्योतिष परामर्श

बालागाम,ता.केशोद,जिला.जूनागढ़,गुजरात,भारत(इन्डिया) पिन:362220

www.vyaspanchang.com, help@vyaspanchang.com, MO.NO.94087 28736 (11 AM TO 06 PM)

# त्रिपिंडी श्राध्द पद्धती

संस्कृत

VYAS PANCHANG

3

# त्रिपिंडी श्राध्द पद्धती



संपादक
ह.भ.प.आचार्य–श्रीकृष्ण शुक्ल
अमळनेरकर

किंमत=११ रूपये

Scanned by CamScanner

## अनुक्रमणिका


| अ.न. | विषय |
| --- | --- |
| १) | त्रिपिंडी श्राध्द निर्णय |
| २) | हेमाद्रि स्नान संकल्प |
| ३) | दशविध स्नानानि |
| ४) | नूतन यज्ञोपवीत धारणम् |
| ५) | सूर्योपस्थान: |
| ६) | ब्रह्मयज्ञ प्रयोग. |
| ७) | महाविष्णु पूजन संकल्प |
| ८) | ह्न्दयादि न्यास |
| ९) | करन्यास |
| १०) | शोडषोपचारै विष्णु पूजनम् |
| ११) | त्रिपिंडी श्राध्द संकल्प |
| १२) | कलश स्थापन–पूजनम् |
| १३) | अग्न्युत्तारणम् |
| १४) | प्रतिमा स्थापन–पूजनम् |
| १५) | ब्राह्मण प्रार्थना, कलशोपरि सूक्त जप । |
| १६) | त्रिपिंडी श्राध्द–विधि |
| १७) | तिलाक्षतैर्दिग्बंध कार्यम् |
| १८) | कुशोपरि भूमि प्रार्थना |
| १९) | तिलोदक करणं–श्राध्दीय द्रव्य प्रोक्षणम् |
| २०) | अर्घ्य दानम्–भोजन संकल्प |
| २१) | रेखाकरणम्–पिंड दानम्- षडंजलि |
| २२) | पिंड पूजा–सुप्रोक्षिकादि करणम् |
| २३) | पिंडमूले तिलोदकं–शंखोदकेन तर्पणम्<br>१) ब्रह्म तर्पणम् २) विष्णु तर्पणम् ३) रूद्र तर्पणम् |
| २४) | पिंडोपरि सुप्रोक्षिकादि करणम् |
| २५) | पिंडं उधृत्य–आघ्राय–विसर्जनम् |
| २६) | पंच वाक्यात्मक पुण्याह वाचनम् |
| २७) | दशविध दानम् |


Scanned by CamScanner

# त्रिपिंडी श्राध्द-साहित्य

धोतर पाने-३ नग
उपरणे-३ नग
नवे कलश-३ नग
तबकड्या-३ नग
तांदुळ-२ किलो
गहु- १ किलो
तीळ-१ किलो
(१) विष्णु-सुवर्ण प्रतिमा
(२) रूद्र-ताम्र प्रतिमा
(३) ब्रह्मा-रजत प्रतिमा
नारळ-४ नग
सुपारी-१५ नग
खारीक- १५ नग
बदाम-१५ नग
नागवेली पाने- २५ नग
केळी- १२ नग
पंचरंगी नाडा-१ हात
उदबत्ती पुडा-१ नग
जानवे- ५ नग
अत्तराची बाटली-१ नग
तीळ- जव-गोपीचंदन-भस्म
दुध-१ लीटर
पंचामृत-दुध,दही,तूप,मध,साखर
गव्हाचे पीठ-१ पाव
तांदळाचे पीठ- १ पाव
तिळाचा कूट- १ पाव
गोमूत्र,गाईचे शेण,पणती

लांब वाती-फुलवाती
आंब्याची पाने
लाल कपडा-१ पीस
पांढरा कपडा- १ पीस
काळा कपडा- १ पीस
खजूर- अदपाव
लिंबू- २ नग
आगपेटी,चिल्लर-पंचवीस रूपयांची
पाट- ३ नग
तांबे- २ नग
ताटे- २ नग
वाट्या- ५ नग
फुलपात्रे- २ नग
आचमनी- १ नग
आसन- ३ नग
संध्यापात्र- १ नग
बादली- १ नग
फुले,तुळशी,
यजमानाचे वस्त्र-धोतर,उपरणे
नवी साडी,ब्लाऊज.

**दशदाने**

| | |
|---|---|
| १) गोदान | २) कमंडलु |
| ३)तिलपात्र | ४) घृतपात्र |
| ५) कास्यपात्र | ६) उपानह |
| ७) छत्र | ८) वस्त्र |
| ९) सुवर्ण | १०)दक्षिणा |

# ।। त्रिपींडी श्राध्द निर्णय ।।

गर्गमतेन– आषाढे–श्रावणमासे कुर्याद् भाद्रपदे तथा।
आश्विने नैव कर्तव्यं इति गर्गादि भाषितम् ॥१॥
कार्तिके–मार्गशीर्षे वा माघे फाल्गुनके तथा।
वैशाखे जेष्ठ मासे वा क्वचित् मधु गृह्यते ॥२॥
कृष्ण पक्षे चतुर्दश्यां अष्टम्यादि दिनत्रयं।
त्रिपिंडी कार्य ते सस्य सर्व कामार्थ सिध्दये ॥३॥
कृष्णा चतुर्दशी;अष्टम्यां शुक्ल चतुर्दश्यां कुर्यात् ॥४॥

अन्यमतेन्– त्रिपिंडी सर्व मासेषु कर्तव्यो, पौषाषाढेन कारयेत्।
दशम्यादि पंचतिथिषु कार्यपुत्र संस्मृध्दये ॥१॥
त्रिपिंडी विधिवत् कुर्यात् दारापुत्र स्थिरोभवेत्।
मानसं खेद संतापं विलयंति च तत्क्षणात् ॥२॥
अद्वेश्य द्वेषि कलत्रं धनपुत्र प्रदायनं
ते नरा सुख सौभाग्यं धन आरोग्य संपदा ॥३॥

चैत्र मासे न कर्तव्यं ज्येष्ठाषाढ एव च। भाद्रपदे तथा पौषे फाल्गुने शुक्ल पक्षयो:।
एते मासे न कर्तव्यं पितृणां नोप तिष्ठ ति ॥४॥
वैशाखे श्रावणे मासे कार्तिके मार्गशीर्षके। माघे फाल्गुने कृष्णे च सुपुत्रो कुरूते यदि।
दशपुर्वा दशापरान् अधो गच्छति मानवा: ॥५॥
नरके रौरवे कुंडे पतिते पूर्वजं यदा।
सुपुत्रेण यदा चैव कुरूते मानवा:शुभं त्रिपिंडी सर्व मध्ये च कुरूते च सुपुत्रकम्।
तस्य कुले न भवेत् प्रेत,पीडा चैव कदाचन ॥६॥
सर्व लक्ष्मी भवेत्तस्य पुत्र पौत्र धनागमम्।
रिपुणां च क्षयं यांति सर्व सौख्य फलप्रदा: ॥७॥
सवत्स धेनु दानेन पूर्वजानां गति र्भवेत्।
अधोगच्छंति य: प्राणी तस्य मुक्तिर्न संशय: ॥८॥
नवमी चतुर्दश चैव पौर्णिमासी यदा भवेत्।
दशम्यां कृष्ण पक्षे च त्रयोदश्यां यथाऽपिवा ॥९॥
त्रिपिंडी करणं कुर्यात् शुकल पक्षे च पंचमी। कार्तिके शुक्ल पक्षे च अष्टम्यां च चतुर्दशी ॥१०॥
पौर्णिमास्यां यदा कार्या पक्षयो उंभयोरपि।
कार्तिकादि शुभे मासे उत्तरायणे गते रव्यौ ॥११॥
त्रिपिंडी करणं कार्यं प्रेतानां मुक्तिदा भवेत् ॥

शुक्ल पक्षात:– ५,८,९,१४,१५. वद्य पक्षात:–८,१०,१३,१४.



Scanned by CamScanner

संकल्पः-

त्रिपिंडी श्राध्दांग भूतं प्रायश्चित्तो तीर्थ स्नानादिषु च हेमाद्रि प्रोक्त महास्नानं करीष्ये ॥

हस्ते: (जलाक्षत-पूगीफलं-दक्षिणा-श्रीफलं धृत्वा)

ब्रह्म हत्या सुरापानं स्तेयं गुर्वंगनागमः । महन्ति पातका न्याहुः संसर्गश्चापि तैः सह । गुरूणां मध्यादि क्षेपो वेदनिं दा सुहृन्दवधः । ब्रह्महत्या समंनेषु मधीतस्य विनाशनम् । अमृतंच समुत्कर्षे राजगामिच मैथुनम् । गुरोश्चालीकं निर्बंधः समानि ब्रह्महत्यया । ब्रह्मो ज्झता वेदनिंदा कौट साक्ष्यं सुहृन्दवधः । गर्हितानाद्ययोर्जग्धिः सुरापान सम. निषद् । निषिध्द भक्षणं जैह्मम्य मुत्कर्षे च कोऽनृतम् ॥

रजस्वला मुखास्वाद सुराप्रान समानिषट् । निक्षेपस्या हरणं चैव नराक्षर जतस्य च । भूमी वज्र मणीनां च रूक्मस्तेय् समं स्मृतम् । अश्वरत्नं मनुष्य स्त्री भूधेनु हरणं तथा । निक्षेपस्य च सर्वं हि सुवर्णस्तेय संमितम् ॥

याज्ञवल्क्यः- सखि-भार्या-कुमारीषु-स्वयोनिषु अन्त्यजासुच । स्व गोत्रासु सुतस्त्रीसु गुरुतल्प समं स्मृतम् । पितुःस्वसारं मातुश्च मातुलानी स्नुषामपि । मातुः सपत्नि भगिनीं आचार्य तनयां तथा । आचार्य पत्नि स्वसुतां गच्छस्तु गुरूतल्पगः ।

मनुस्मृतीः- खर-अश्व-उष्ट्र मृगे भा नाम जीविकः वधस्तथा । संकरीकरणं ज्ञेयं मीनाहि महिसष्य च ॥ कृमी कीटकयोः हत्या मद्यानुगत भोजनम् । फलैधः कुसुम हस्तेय अधैर्यंच मलावहम् । निन्दितंभ्यो धनादानं वाणीज्यं शूद्र सेवनम् । अपात्री करणं ज्ञेयं असत्यस्य च भाषणम् । ब्राह्मणस्य रूजः कृत्वा घ्रातिर्अघ्रेय मद्ययोः । जैहम्यं च मैथुनं पुंसि जातिभ्रंश करं स्मृतम् ॥ ॥ इति हेमाद्री स्नांन संकल्प ॥



Scanned by CamScanner

## ।। दशविध स्नानानि ।।

संकल्प:-

स्वदेह शुध्यर्थं विशिष्टे तीर्थे वा महानद्यां गत्वा हस्ते:

''त्रिपिंडी -श्राध्दांग भूतं'' समस्त पाप क्षयार्थ ''दशविध स्नान- महं करिष्ये ।।

१)भस्मस्नानम्- मानस्तोके तनये०

यथाऽग्नीर्दहते भस्म तृण काष्ठादि संचयम्।
तथा मे दह्यतां पापं कुरू भस्म शुचें शुचीम् ।।१।।

२)मृत्तिका स्नानम्- इदं विष्णुर्विचक्रमे०

अश्वक्रांन्ते रथक्रांन्ते विष्णुक्रांन्ते वसुंधरे।
शिरसा धारयिष्यामि रक्षस्व मां पदे पदे ।।२।।

३)गोमय स्नानम्- मानस्तोके तनये मानऽ ०

गोमय वसते लक्ष्मी: पवित्रं सर्व मंगला ।
स्नानार्थं संस्कृता देवी पापं मे हर गोमय ।।३।।

४)पंचगव्य स्नानम्- सहस्त्र शीर्षा पुरूष:०

गोमूत्रं - गोमयं-क्षीरं-दधि-सर्पि-समन्वितम्।
सर्व पाप विशुध्यर्थं पंचगव्य पुनातु माम् ।।४।।

५)गोरज स्नानम्- आयंगौ:पृश्निरक्रमी०

गवां खूरेण निर्धूतं यद्रेणू गगनेगतम्।
शिरसा तेन संलेपे महापातक नाशनम् ।।५।।

६)धान्य स्नानम्- धान्यमसि धिनुहि देवान्०

धान्यौषधी मनुष्याणां जीवनं परमं स्मृतम्।
तेन स्नानेन देवेश मम पापं व्यपोहतु ।।६।।

७)फल स्नानांनी- या:फलिनीर्याऽ अफला०

वनस्पति रसो दिव्यो फल-पुष्प वृत: सदा।
तेन स्नानेन मे देव फलं लब्ध्वं अनन्तकम् ।।७।।

८)सर्वौषधी स्नानम्- औषधय: समवदन्त०

औषध्य: सर्व वृक्षाणां वृक्ष गुल्म लतास्तुया:।
दुर्वा सर्षप संयुक्ता सर्वौषध्य: पुनंतु माम् ।।८।।



Scanned by CamScanner

९) कुशोदक स्नानम् – देवस्यत्वा सवितुः०

कुशमूले स्थितो ब्रह्मा कुशमध्ये जनार्दनः।
कुशाग्रे शंकरो देव स्ते नश्यंतु मम पातकम् ॥९॥

१०) हिरण्य स्नानम् – हिरण्य गर्भः०

हिरण्य गर्भ गर्भस्थं हेम बीजं विभावसोः।
अनन्त पुण्य फलद मतः शांतिं प्रयच्छमे ॥१०॥

॥ इति दशविध स्नानानि ॥

## नूतन यज्ञोपवीत धारणम्

१) भस्म धारणम्। २) शिखाबंधनम्। ३) आचम्य प्राणायामं कृत्वा ॥

संकल्प–

अद्य पूर्वोच्चारित एवं गुण विशेषण० शुभ पुण्य तिथौ अमुकगोत्रोत्पन्नस्य अ० शर्मण (वर्मा–दास–गुप्ता) श्रौत–स्मार्त कर्मानुष्ठान सिद्ध्यर्थं त्रिपिंडी श्राद्धांगत्वेन नूतन यज्ञोपवीत धारणमहं करिष्ये।

(आदौ यज्ञोपीत प्रक्षालनम्) ॐ आपोहिष्ठा०॥ ॐ यो वः शिवतमो०॥
ॐ तस्माऽअरंगमा०॥ इति मंत्रेण प्रक्षालनम् ॥

ततो यज्ञोपवितं कर संपुटं कृत्वा दशवारं गायत्री मंत्रेन अभिमंत्रयेत् ॥

ॐ भुर्भुवः स्वः तत्स वितुर्वरेण्यंम्०॥

ग्रंथिषु देवता आवाहनम्

| | | |
|---|---|---|
| १) प्रथम तन्तौ– | ॐ काराय नमः॥ | ॐ कारं आवाहयामि॥ |
| २) द्वितीय तन्तौ– | ॐ अग्नये नमः॥ | अग्निं आवाहयामि॥ |
| ३) तृतीय तन्तौ– | ॐ नागेभ्यो नमः॥ | नागान् आवाहयामि॥ |
| ४) चतुर्थ तन्तौ– | ॐ सोमाय नमः॥ | सोमं आवाहयामि॥ |
| ५) पंचम तन्तौ– | ॐ पितृभ्यो नमः॥ | पितृन् आवाहयामि॥ |
| ६) षष्ठम तन्तौ– | ॐ प्रजापतये नमः॥ | प्रजापतिं आवाहयामि॥ |
| ७) सप्तम तन्तौ– | ॐ अनिलाय नमः॥ | अनिलं आवाहयामि॥ |
| ८) अष्टम तन्तौ– | ॐ यमाय नमः॥ | यमं आवाहयामि॥ |
| ९) नवम तन्तौ– | ॐ विश्वेभ्यो देवेभ्यो नमः॥ | विश्वान् देवान् आवाहयामि॥ |

यज्ञोपवीत ग्रंथीमध्ये –

ब्रह्म-विष्णु-रुद्रेभ्यो नमः॥ ब्रह्म विष्णु रुद्रान् आवाहयामि ॥ आवाहित देवता: सुप्रतिष्ठा वरदा भवत॥

ततः पूजनं कुर्यात् – प्रणवादि आवाहित–यज्ञोपवीत देवताभ्यो नमः गंध पुष्पाणि समर्पयामि। (वा मानसोपचारैः संपूज्य)

सूर्य प्रदर्शनं–ॐ तच्चक्षुर्देवहितं ०॥

यज्ञोपवीत धारणं– यज्ञोपवीत इति मंत्रस्य परमेष्ठी ऋषिः लिंगोक्तादेवता त्रिष्टुप् छंदः यज्ञोपवीत धारणे विनियोगः॥

ॐ यज्ञोपवीतं परमं०॥१॥ यज्ञोपवीतमसि यज्ञस्यत्वा यज्ञोपवीतेनो पनह्यामि॥२॥

दक्षिण हस्ते धृत्वा प्रति यज्ञोपवीतं॥ आचमनं॥

जीर्ण यज्ञोपवीत त्यागः– एतावद्दिन पर्यंतं ब्रह्मत्वं धारितं मया। जीर्ण त्वात्तत्परित्यागो गच्छसूत्र यथा सुखम्॥१॥

इति मंत्रेण जीर्ण यज्ञोपवीतं शिरोमार्गेण निःसार्य शुध्द भूमौ त्यजेत्॥ पश्चात् यथाशक्ति गायत्रीं जपेत्॥

संकल्प – अनेन नूतन यज्ञोपवीत धारणाख्येन कर्मणा भगवान यथाशक्ति गायत्री जप कर्मणा श्री सविता देवता प्रीयंतां नमम॥

पुनः संकल्प–अनेन नूतन यज्ञोपवीत धारणाख्येन कर्मणा मम श्रौत–स्मार्त कर्मानुष्ठान सिध्यर्थं श्री परमेश्वरः प्रीयंतां नमम॥

## सूर्योपस्थान

आचम्य। प्राणाना० अद्य पूर्वो० शु.पु.ममात्मना श्री सवितृ सूर्य नारायण प्रीत्यर्थं सूर्योपस्थान महं करिष्ये॥

कुश पवित्र धारणम्॥ ॐ पवित्रेस्थो० इति मंत्रेण सूर्य गंधाक्षत–श्वेतपुष्प–तुलसी दलं धृत्वा–सूर्य मुदीक्षन्–ॐ उद्वयन्त मस०। ॐ उदुत्यं जातवेद०। ॐ चित्रन्देवान०। ॐ तच्चक्षुर्देव०। ॐ तत्सवितुर्वरेण्यं०। ॐ विभ्राड (१७ अनु.) ॐ सहस्त्र शीर्षा० (१६ अनु.) यज्जाग्रतो इत्यारभ्य सुखारस्थिरक्षा०। (६ अनु.) अनंतरं–

ॐ यदेतन्मंडलं तपति तन्महदुक्थंतां ऋचः स ऋचां लोकोथ यदेतदर्चिर्दीप्यते तन्महा व्रतंतानि सामानि साम्नां लोकोथ यऽएषऽएतास्मिन्मंडले पुरुषः सोऽग्निस्तानि यजूꣳषि स यजुषां लोकः॥१॥

एतैमंत्रै: उपस्थाय पाण्योर्गृहीत कुशादीन् कुशपवित्रे च पूर्वस्यां दिशि त्यक्तवा सूर्यं प्रदक्षिणी कृत्य ॥

अनेन यथा शक्त्या कृतेन श्री भगवान सूर्य नारायण: प्रीयतां नमम०॥

॥ इति सूर्योपस्थानम् ॥



## अथ ब्रह्मयज्ञ प्रयोग:

दर्भासनोपरि प्राङ्मुखं उपविश्य आचम्य०प्राणानायम्य०

कुश पवित्र धारणम्–ॐ पवित्रेस्थो०॥

संकल्प–अद्य पूर्वो० शु.पु. ॐ तत्सत् श्री परमेश्वर प्रीत्यर्थ यथाशक्ति ब्रह्म यज्ञेनाहं यक्षे ॥

पुन: संकल्प– इषेत्वादिषु मंत्रेषु खं ब्रह्मान्तेषु दशप्रणव सहितेषु या: क्रिया तत्र विवस्वात ऋषि: प्रजापतिर्देवता सर्वाणि छंदा॰ऽसि सर्वाणि सामानि प्रतिलिंगोक्ता देवता ब्रह्मयज्ञे विनियोग:॥

तत्रादौ न्यास–

| | |
|---|---|
| १) ॐ गौतम भरद्वाजाभ्यां नम:। | नेत्रयो:॥ |
| २) ॐ विश्वामित्र जमदग्निभ्यां नम:। | श्रोत्रयो:॥ |
| ३) ॐ वसिष्ठ कश्यपाभ्यां नम:। | नासिकयो:॥ |
| ४) ॐ अत्रये नम:। | वाचि:॥ |
| ५) ॐ गायत्र्यग्निभ्यां नम:। | शिरसि:॥ |
| ६) ॐ उष्णिक् सवितृभ्यां नम:। | ग्रीवायाम् ॥ |
| ७) ॐ बृहती बृहस्पतिभ्यां नम:। | अनूके॥ |
| ८) ॐ बृहद्रथन्तर द्यावा पृथिवीभ्यां नम:। | बाव्हो:॥ |
| ९) ॐ त्रिष्टुप् इंद्राभ्यां नम:। | नाभौ ॥ |
| १०)ॐ जगत्यादित्याभ्यां नम:। | श्रोष्ठ्यौ:॥ |
| ११)ॐ अति छंदा प्रजापतिभ्यां नम:। | लिंगे॥ |
| १२)ॐ यज्ञा यज्ञीय वैश्वानराभ्यां नम:। | गुदे॥ |
| १३)ॐ अनुष्टुप् विश्वेभ्यो देवेभ्यो नम:। | उर्वो:॥ |
| १४)ॐ पंक्ति मरुद्भ्यो नम:। | जान्वो:॥ |
| १५)ॐ द्विपद विष्णुभ्यां नम:। | पादयो:॥ |



Scanned by CamScanner

१६) ॐ विच्छन्दा वायुभ्यां नम:। नासा पुटस्थ प्राणेषु ॥
१७) ॐ न्यूनाक्षर छन्दोभ्यो नम:। सर्वांगेषु ॥
ततोवामहस्ते दर्भ–जल–यवाक्षत–चंदनादिन् क्षिप्त्वा तद् उपरि दक्षिण हस्तं निधाय । दक्षिण जानूपरि निधाय–
बक्षमाण मंत्रान् पठेत् ॥ ॐ भुर्भव:स्व: तत्सवितुर्वरेण्यं०॥१॥
ॐ इषेत्वोर्जेत्वा०॥२॥ ॐ व्वसो: पवित्रमसि०॥३॥ ॐ हिरण्मयेन पात्रेण:॥४॥
ॐ खं ब्रह्म०॥५॥ ॐ व्रतमुपैख्य नन्तरेणा हवनीयं च गार्हपत्यं च प्रांङतिष्ठन्नपऽ उपस्पृश्यति ॥ तद्यतथ उपस्पृश्यत्य मेध्योवै पुरूषो यदनृतं वदति तेन पूतिरन्तरतो मेध्योऽ वा आप:॥ पवित्रपूतो व्रतमुपायानीति तस्माद्वाऽअपऽउपस्पृश्यति ॥१॥
सोऽग्नि मेवा भीक्षमाणो व्रत मुपैति ॥ ॐ प्राश्निपुत्रात् आसूरी वासिन: प्राश्निपुत्रऽ–आसुरायणात् आयुरायणऽआसुरे आसुरी याज्ञवल्क्यात् याज्ञवल्क्यऽउद्दालकात् उद्दालको अरूणात् अरूणऽउपवेशे उपवेशि:कुश्रे:कुश्रीर्वाजश्रव सो वाजश्रवा जिव्हावतो बाध्यो गा जिव्हावान् बाध्योगोसिता द्वारेषगणात् असितो वार्षगणो हरितात्कश्यपात् हरित: कश्यप:कश्यपानैधृवे: कश्यपो नैधृविर्वाचोवा गंभिण्याऽअंभिण्या दित्यानि इमानि शुक्लानि यजू ँषि वाजसने येन याज्ञवल्केन आख्यायन्ते ॥ ॐ अग्निमीळे पुरोहितं०॥ ॐ अग्नऽआयाहि वीतये०॥
ॐ शंन्नोदेवी०॥ ॐ अथानु वाकान्वक्षामि ॥ अथातोऽधिकार:। ॐ मंडलं दक्षिणमक्षि ह्न्दयं । अथ शिक्षां प्रवक्ष्यामि । फलयुक्तानि कर्माणि । अथातो गृह्यस्थाल पाकानां कर्म । वृध्दिरादैच । समाम्नाय समाम्नात: । म य र स त ज भ न ल ग संमितम् । पंच संवत्सर मयं । युगाध्यक्षम् । गौ:ग्मा । अथातो धर्म जिज्ञासा । अथातो ब्रह्म जिज्ञासा । योगीश्वरं याज्ञवल्क्यं । नारायणं नमस्कृत्य । इति विद्या तपोयोनि रयोनिर्विष्णु रीडित:। वाय्यज्ञे नार्चितो देव: प्रीयतां मे जनार्दन:॥
एवं ब्रह्मयज्ञं विधाय– पाण्योर्गृहीत कुशादीन् उत्तरस्यां त्यजेत् ॥ अर्पणम् ॥
संकल्प– अनेन ब्रह्म यज्ञाख्येन कर्मणा भगवान् श्री परमेश्वर: प्रीयतां नमम ॥
ॐ तत्सद् ब्रह्मार्पणममस्तु ॥ यस्य स्मृत्याच नामोक्त्या तपोयज्ञ: क्रियानिषु । न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतम् ॥१॥

॥ इति ब्रह्म यज्ञ प्रयोग: ॥



Scanned by CamScanner



## || महा विष्णु पूजन-संकल्पः ||



आचम्य० प्राणानायम्य० अद्येत्यादि० एवंगुण वि.वि.

शुभ पुण्यतिथौ ० ममात्मना०दिविस्थानां अंतरिक्षस्थानां भूमिस्थानां अज्ञात नाम गोत्राणां सात्विक-राजस-तामस-प्रेतानां मोक्षार्थानां मम (अमुकामुकाया:)शरिर पीडा वर्तमानांत तूत्नतोप द्रव्य निरसनार्थे पूर्व संकल्पित ''त्रिपिंडी श्राध्द'' मम आरोग्य संतत्यादि प्रतिबंध निवृत्त्यर्थं त्रिपिंडी श्राध्दे अधिकार सिध्यर्थं श्री महा-विष्णु-पूजन महं करिष्ये ||

तत्रादौ निर्विघ्नता सिध्यर्थं गणपति स्मरणं-कलशाराधनं। रक्षा दीपं निधाय। ह्न्दयादि न्यासः, करन्यासादिकं कुर्यात् || इति संकल्पः ||

१) सहस्त्र शीर्षेति.....वाम कराय। २) पुरूष एवेदेति.....दक्षिण कराय।

३) एतावानस्येति.....वाम पादे। ४) त्रिपादूर्ध्व.....दक्षिण पादे।

५) ततो विराड् जायत.....वाम जंघा। ६) तस्माद्यज्ञात्.....दक्षिण जंघा।

७) तस्माद्यज्ञात्.....कटयां। ८) तस्मादश्वा.....नाभौ।

९) तं यज्ञं.....ह्न्दये १०) यत्पुरूषं.....कंठे।

११)ब्राह्मणोस्य मुख.....वाम बाहु। १२) चंद्रमा मनसो.....दक्षिण बाहु।

१३)नाभ्याऽआ.....मुखे। १४) यत्पुरूषेण.....नासिकयोः।

१५) सप्तास्यासन्.....नेत्रयोः। १६) यज्ञेन यज्ञमय.....सर्वांगेषु।

|| इति ह्न्दयादि न्यासः ||

## || अथ करन्यासः || -

१) ॐ केशवाय नमः - अंगुष्ठाभ्यां नमः ||

२) ॐ नारायणाय नमः- तर्जनीभ्यां नमः ||

३) ॐ माधवाय नमः- मध्यमाभ्यां नमः ||

४) ॐ गोविंदाय नमः- अनामिकाभ्यां नमः ||

५) ॐ विष्णवे नमः- कनिष्ठिकाभ्यां नमः ||

६) ॐ मधुसूदनाय नमः- करतल करपृष्ठाभ्यां नमः ||

७) ॐ त्रिविक्रमाय नमः- ह्न्दयाय नमः ||



Scanned by CamScanner

८) ॐ वामनाय नमः:- शिरसे स्वाहा ॥

९) श्रीधराय नमः:- शिखायै वषट् ॥

१०)ॐ ऋषिकेशाय नमः:- कवचाय हुम् ॥

११)ॐ प्रद्युम्नाय नमः:- नेत्रत्रयाय वौषट् ॥

१२)ॐ दामोदराय नमः:- अस्त्राय फट् ॥

अथ ध्यानम्-

शांताकारं भुजग शयनं पद्मनाभं सुरेशं ।
विश्वाधारं गगन सदृशं मेघवर्णं शुभांगम् ॥
लक्ष्मीकान्तं कमल नयनं योगिभिर्ध्यानगम्यं ।
वंदे विष्णुं भवभय हरं सर्व लोकैक नाथम् ॥ १॥
कृष्ण कृष्ण कृपालोत्वं अगतिनां गतिर्भव ।
संसारार्णव मग्नानां प्रसीद परमेश्वर ॥ २॥

॥ इति करन्यासः ॥

## ॥ शोडष उपचारैः विष्णु पूजनम् ॥

१) ॐ सहस्त्र शीर्षा..... आवाहनम् ॥
२) ॐ पुरूष एवेद्...... आसनम् ॥
३) ॐ एतावानस्य..... पाद्यं ॥
४) ॐ त्रिपादूर्ध्व..... अर्घ्यं ॥
५) ॐ ततो विराड्..... आचमनम् ॥
६) ॐ तस्माद्यज्ञात्..... यज्ञोपवीतम् ॥
७) ॐ तस्माद्यज्ञात्..... वस्त्रम् ॥
८) ॐ तस्मादश्वा..... गंधम् ॥
९) ॐ तंयज्ञं बर्हिषि..... अक्षतां ॥
१०) ॐ यत्पुरूषं व्यद..... पुष्पम् ॥
११) ॐ ब्राह्मणोस्य मुख...... धूपम् ॥
१२) ॐ चंद्रमा मनसो..... दीपं ॥

१३) ॐ नाभ्याऽआसीदन्..... नैवेद्यं ॥

१४) ॐ यत्पुरूषेण हविषा..... फल-तांबुल-दक्षिणा ॥

१५) ॐ सप्तास्यान्..... प्रदक्षिणाम् ॥

१६) ॐ यज्ञेन यज्ञमय..... नमस्कारः ॥

अनेन शोडषोपचार पूजनेन श्री महाविष्णुःप्रीयतां नमम ॥

प्रार्थयेत्- जय त्वं देव देवेश यमधर्म नराक्षर।

जय कामद भक्तानां महाविष्णु नमोस्तुते॥१॥

अच्युतानंत देवेश। अगतिनां गतिर्भव।

संसारार्णव मग्नानां प्रसीदे परमेश्वर ॥२॥

## त्रिपिंडी श्राध्द संकल्प

अपसव्यं-

...गुण वि० वि० मम सकल पाप दृष्ट दोष निरसनार्थं देह सौख्यता प्राप्त्यर्थं। दारिद्रय नाशाय। शरीरारोग्यता। भूमि अंतरिक्ष दैव्यकृत पीडां विनाशनार्थं अस्मत् कुले नादिष्ट गोत्राणां अनादिष्ट असापेक्षिकानां उध्दरणार्थं ब्रह्मा-विष्णु-रूद्र शर्मणां। ...त्व-रज-तामस रूपाणां असद् गतिकानां स्वर्ग लोकादि अक्षय्य विष्णु लोको-प्तये एकोदिष्ट विधिनां त्रिपिंडी श्राध्दं करिष्ये ॥ सव्यं-

...) महीद्यौरिंती-ताम्र, रौप्य, स्वर्णमयं व लश स्था.पू. कृत्वा ॥

...) अग्न्युत्तारण पूर्वक- ताम्र, रौप्य, सुवर्णमयं ब्रह्मा, विष्णु, रूद्र, प्रतिमानां स्थापन-पूजनं च करिष्ये ॥

...) ब्राह्मण प्रार्थना-नमोऽस्त्वनंताय० इ ते मंत्रेण ॥

...) कलशोपरि सूक्तं दधात्-

अ) ब्रह्म कलशे- ॐ तेजोऽसि ॥१॥ ब्रह्म यज्ञानं ॥२॥

ब) विष्णु कलशे-ॐ सहस्त्र शीर्षा पुरूषः ॥१॥

क) रूद्र कलशे-ॐ नमस्ते रूद्र मन्यव ॥१॥

त्रिदेवानां जप-कर्म विधेयं न्यूनातिरिक्तं त्रिन्देवतानां जाप्य कृतेन प्रसादात् सर्वं परिपूर्णतास्तु ॥ अस्तु परिपूर्णताम् ॥

॥ इति संकल्पः ॥

# त्रिपिंडी श्राध्द विधि

दक्षिणाभि मुखो भूत्वा, गोमयेन, पुरतो मंडले।
विधाय दर्भत्र्यान चटान्निर्माय स्थापयेत् ॥

सव्यं– आचम्य० कुश पवित्र धारणम्० एवंगुण०

अपसव्यं– अनादिष्ट गोत्रानाँ अस्मत्कुले अनिर्दिष्ट सा पेक्षिकानां ब्रह्मा–विष्णु–रुद्र शर्मणां सत्व–रज–तामसानां प्रीतये त्रिपिंडी श्राध्द मह करिष्ये ॥ ॐ कुरुष्व ॥

१) अनिर्दिष्ट गोत्राणां अनिर्दिष्ट सापेक्षिक ब्रह्म शर्मन् सात्विक रूप, श्राध्दे क्षण: क्रीयतां। तथा प्राप्नुतां भवंतु प्राप्नवानि ॥१॥

२) अनिर्दिष्ट गोत्राणां अनिर्दिष्ट सापेक्षिक विष्णु शर्मन् राजस रूप श्राध्दे क्षण: क्रियतां। तथा प्राप्नुतां भवंतु प्राप्नवानि ॥२॥

३) अनिर्दिष्ट गोत्राणां अनिर्दिष्ट सापेक्षिक रुद्र शर्मन् तामस रूप, श्राध्दे क्षण: क्रियतां। तथा प्राप्नुतां भवंतु प्राप्नवानि ॥३॥ सव्यं– प्रार्थयेत्–

समस्त संपत्सम वाप्ति हेतव: समुत्थितापत् कुल धूम केतव:।
अपार संसार समुद्र सेतव: पुनंतु मां ब्राह्मण पाद पांसव: ॥
आपध्वच ध्वांत सहस्त्रभानव: समीहि तार्थार्पण काम धेनव:।
समस्त तीर्थांबु पवित्र मूर्तयो रक्षंतु मां ब्राह्मण पाद पांसव: ॥१॥

अपसव्यं– एवं चटत्रये, एतद्व पाद्यं पादावनेजनं एष वो अर्घ:। पितृभ्यं स्वधायिभ्य: इति मंत्रेण अर्घ दधात् ॥१॥

तिलाक्षतैर्दिग्बंध कार्यम्–

अग्निष्वात्ता: पितृगणा: प्राचीं रक्षंतु मे दिशम्।
तथा बर्हिषद: पांतु याम्यां ये पितर स्तथा ॥
प्रती ची माज्य पास्तद्वत् उदीचीमपि सोमपा:।
ऊर्ध्वस्तद् अर्यमा रक्षेत्कव्यवाड नलोप्यध: ॥
रक्षो भूत पिशाचेभ्य: स्तथैवासुर दूषिता:।
सर्वतश्चापि धिप स्तेषां यमो रक्षां करोतु मे ॥
वायुर्भूत पितृणां च तृप्तिर्भवती शाश्वती।
य इमं श्राध्द काले तु कुर्याद्वै पितृपजरम् ॥
अक्षय्यं तद् भवेत् श्राध्दं पितृभ्य:परिरक्षतु ॥१॥

अपसव्यं– तिला रक्षंतु असुरात्। सव्यं– दर्भा: रक्षंतु राक्षसात्। पंक्ति वै श्रोत्रियो रक्षे दतिथि: सर्व रक्षक: ॥ अपसव्यं– निवि बंधनं– (तिल कुशानादाय दक्षिण कटौ निवि बंधनम् )



Scanned by CamScanner

सोमस्य निविरसि व्विष्णोः शर्मारि शर्म्म यजमान सैंद्रस्य योनिरसि सुसस्याः कृषि स्कृधि॥ इति॥

संकल्प- मम शरीरे रोग विमुक्त्यर्थं-संतति-संपत्ति प्राप्त्यर्थं-सकल बाधा शमनार्थं-अनिर्दिष्ट गोत्राणां अनि. सापेक्षिकानां ब्रह्म, विष्णु, रूद्र शर्मनां सात्विक-राजस-तामस-रूपाणां असद्गतिकानां उध्द्रणार्थं स्वर्ग लोकादि अक्षय्य विष्णु-लोका वासये एकोद्दिष्ट विधीनां एकतंत्रेण ''त्रिपिंडी श्राध्दं'' करिष्ये॥

सव्यं कुशोपरीभूमी प्रार्थना-

श्राध्द भूमौ गयां ध्या वा ध्यात्वा देवं गदाधरं।
ताभ्यां चैव नमस्का ततः श्राध्दं प्रवर्तयेत्॥
सप्तव्याधा दशारण्ये मृगाःकाल जिरे गिरौ।
चक्रवाकाःशरद्विपे हंसाःसरसि मानसे॥
तेऽपि जाता कुरूक्षेत्रे ब्राह्मणाः वेद पारगाः॥
प्रस्थिता दीर्घ मध्वानं यूयं तेभ्योऽवसीदथ॥ देवताभ्यश्च

अपसव्यं-पितृभ्यश्च सव्यं- महायोगिभ्य एव च।

नमः स्वाहायै स्वधायै नित्यमेव नमो नमः।
गयायां पितृ रूपेण स्वयमेव जनार्दनः॥
तं ध्यात्वा पुंडरीकाक्षं मुच्यते च ऋण त्रयात्॥१॥

**॥ तिलोदक करक गम्॥ ईशाने दर्भासनं**

अपसव्यं- आसने पात्रं, पात्रे-

| | |
|---|---|
| १) शन्नो देवी इति- | जलपूरणम्। |
| २) पवित्रेस्थो वैष्णव्यो- | कुश प्रक्षेपः। |
| ३) यवोऽसीती- | यव प्रक्षेपः। |
| ४) तिलोसिऽति- | तिल प्रक्षेपः। |
| ५) त्वां गंधर्वेऽति- | गंध प्रक्षेपः। |
| ६) तूष्णी- | पुगी फलं-पुष्पं-शतपत्राणि भृंगराजःस्तथैव च। मालती मोगरं चैव पितृणां दत्त मक्षयम्॥१॥ |



Scanned by CamScanner

सव्यं– पुनंतु मेति नवभि स्तिलोदक करणं अभिमंत्रणम्–

ॐ पुनंतु मा पितर: सोम्यास: पुनंतु मा पितामहा:।

पुनंतु प्रपितामहा: पवित्रेण शतायुषा: ॥१॥

पुनंतु मा पितामहा: पुनंतु प्रपितामहा:।

पवित्रेण शतायुषा विश्वमायुर्वैष्णव्यै ॥२॥

ॐ अग्न आयूᳬषि पवस आसुवोर्ज मिषंचन: ।

आरेऽबाधस्वद् च्छुनाम् ॥३॥

पुनंतु मां देवजना: पुनंतु मनसा धिय:।

पुनंतु व्विश्वाभूतानि जात वेद:पुनीहिमा ॥

पवित्रेण पुनीहिमा शुक्रेण देव दीद्यत।

अग्ने क्रत्वा ऋतूँऽरनु ॥५॥

यत्ते पवित्र मर्चिष्यग्ने बितत मंतरा।

ब्रह्म तेन पुनातुमा ॥६॥

चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु देवोमा।

सविता पुनात्व च्छिद्रेण पवित्रेण सूर्य स्य रश्मिभि: ।

तस्य ते पवित्र पते पवित्र पूतस्य यत्कामा: पुनेतच्छकेयम् ॥७॥

पुष्कराद्यानि तीर्थानी गंगाद्या: सरितस्तथा।

आगच्छन्तु पवित्राणी श्राध्द काले सदा मम ॥८॥

<u>कुर्चेन श्राध्दीय द्रव्य प्रोक्षणम्</u>– अपसव्यं–तिलं दक जलेन–अपवित्र:–पवित्रोवा०इति॥

सव्यं– य्यद्देवा देव हेडनं देवासश्च कृमाव्वयम्।

अग्निर्म्मा तस्मादेनसो विश्वान्मुंचत्वᳬहस: ॥१॥

यदि दिवा यदि नक्तमेनाᳬसिच कृमाव्वयन्।

वायुर्मा तस्मा देनसो विश्वान्मुचत्वᳬहसा: ॥२॥

यदि जाग्रद्यादि स्वप्न एनाᳬसिच कृमाव्वयम्।

सुर्यो मा तस्मा देनसो विश्वान्मुंचत्वᳬहस: ॥३॥

ॐ तत् सवितुर्वरेण्यम्० ॥४॥

पाकप्रोक्षणम् – सव्यं –

त्रिभिर्गायत्र्या अभिमंत्र्य पाक शालायां गत्वा पाक प्रोक्षणम् ॥

अपसव्यं – पाकादि दोषाः पाकपवित्रता ऽस्तु । देश काल पाक पात्र द्रव्य ... संपदस्तु । सर्वे पाकाः शुचयो भवंतु ॥१॥

१) अनिर्दिष्ट गोत्रस्य अनिर्दिष्ट सापेक्षिकस्य – सात्विक रूप ब्रह्मशर्मन् – इदमासनं सुखासनं हस्त प्रक्षालनं दत्वा, विष्टरार्थे इमौ, कुशौ ॥१॥

२) अनि० गोत्र० अनि० सापे० राजस रूप विष्णु शर्मन् इदमासनं सुखासनं, हस्त – प्रक्षालनं दत्वा, विष्टरार्थे इमौ कुशौ ॥२॥

३) अनि० गोत्र० अनि० सापे० तामस रूप रूद्र शर्मन् इदमासनं, सुखासनं, हस्त प्रक्षालनं दत्वा, विष्टरार्थे इमौ, कुशौ ॥३॥

(त्रयाणां पृथक् पृथक् दद्यात्) – आवाहनं – सव्यं –

विश्वेदेवासऽआगता शृणुताम ऽइमम्, हवम् । एदम् बर्हिर्निषीदत ॥१॥

प्रदक्षिण यवान् विकीर्य – विश्वेदेवाः श्रृणुतेम ऽइमम्, हवम्मे येऽअंतरिक्षे य उपद्य विष्ट ॥ ये अग्नि जिव्हाऽउतवा यजत्रा आसद्यास्मिन्बर्हिषी मादयध्वम् ॥१॥

आगच्छन्तु महाभागा विश्वेदेवा महाबलः । ये चात्र बिहिता सावधाना भवंतु ते ॥२॥

॥ इति पाक प्रोक्षणम् ॥

अर्घदानम् – अपसव्यं –

१) अनिर्दिष्ट गोत्रस्य अनि० सापेक्षिकस्य ब्रह्म शर्मन् सात्विक रूप ।

२) अनिर्दिष्ट गोत्रस्य अनि० सापेक्षिकस्य । विष्णु शर्मन् राजस रूपस्य ।

३) अनिर्दिष्ट गोत्रस्य अनि० सापेक्षिकस्य रूद्र शर्मन् तामस रूपस्य ।

(पृथक् पृथक् दद्यात्) एष तेऽअर्घः स्वधार्घाऽस्तु ॥ इति ॥

सव्यं – गंधादि दानम् –

१) अनिर्दिष्ट गोत्रस्य अनि० सापेक्षिकस्य ब्रह्म शर्मन् सात्विक रूप ।

२) अनिर्दिष्ट गोत्रस्य अनि० सापेक्षिकस्य विष्णु शर्मन् राजस रूप ।

३) अनिर्दिष्ट गोत्रस्य अनि० सापेक्षिकस्य रूद्र शर्मन् तामस रूप ।



Scanned by CamScanner

गंध:सुगंध:। अक्षत पुष्पम् , स्वाक्षत पुष्पम् । यवमाच्छादनं । फलार्थे पूगीफल सुफलं । धारणार्थे यज्ञोपवीतं, सुयज्ञोपवीतं । आच्छादनार्थे वस्त्र वा किंचित् व्यावहारीक द्रव्यं, स्वाच्छादनं । शेषोपचारार्थे इमौ कुशौ, सुकुशौ । इदमनुलेपनं । एतावत्सुमनस एव नो धूप:, सुधूप:। इदं वो दीपं, सुदीपं । शेषोपचारार्थे इमौ कुशौ यथादत्तं गंधार्चन स्वाहा संपद्यंताम् ॥ इति ॥

## भोजन संकल्प

अपसव्यं–
१) अनि०गोत्रस्य अनि०असा०ब्रह्म शर्मणे सात्विक रूप।
२) अनि०गोत्रस्य अनि०असा०विष्णु शर्मणे राजस रूप।
३) अनि०गोत्रस्य अनि०असा०रुद्र शर्मणे तामस रूप।
(त्रयाणां पृथक पृथक दद्यात) भोजनं वः स्वधानमः ॥ (अन्न विकीरो नास्ति)
सव्यं– त्रिवारं गायत्रीर्जपित्वा०॥ ॐ मधुव्वाताऽऋतायते०मधु मधु मधु०॥
प्रार्थयेत्– ईशान विष्णु कमलासन कार्तिकेय वन्हित्र यार्क रजनीश गणेश्वराणां।
क्रौंचा मरेंद्र कलेशोद्भव कश्यपानां पादान्नमामि सततं मम पितृ मुक्ति हेतोः ॥१॥
एको विष्णुर्महद्भूतं ॥२॥ ॥ इति भोजन संकल्पः ॥
रेखाकरणम्– अपसव्यं– ॐ अपहताऽअसुरा रक्षा᳚ सि वेदिषदः ॥
उदकोस्पर्श: ॥ रेखायां अवनेजनम्–
१)अनि०गोत्राय अनि०असापे०अस्तत्कुले अनि० ब्रह्म शर्मन् सात्विक रूप।
२)अनि०गोत्राय अनि०असापे०अस्तत्कुले अनि० विष्णु शर्मन् राजस रूप।
३) अनि०गोत्राय अनि०असापे०अस्तत्कुले अनि० रुद्र शर्मन् तामस रूप।
(त्रयाणां पृथक् पृथक् दद्यात्) पिंड स्थाने अवनेजन ॥१॥

॥ इति रेखा करणम् ॥

## !! पिंड दानम् !!

कुशान् आस्तीर्य - तिलान् प्रक्षिप्य - पिंडान् दद्यात् पिंडमध्ये - (घृत - तिलान् - शर्करा - पय - दधि - मधु - गंध - तुलसी - प्रक्षिप्य) प्रथम तंडुल पिंडं गृहित्वा -

अस्मत्कुले मृता ये च गतिर्येषां न विद्यते।
तेषां उध्दारणार्थाय इमं पिंडं ददाम्यहम् ॥१॥
मातामह कुले ये च गतिर्येषां न विद्यते।
पितृवंशे मृता ये च मातृवंशे तथैवच ॥२॥
गुरु श्वशुर बंधूनां ये चान्ये बांधवाः स्मृताः।
तेषां उध्दारणार्थाय इमं पिंडं ददाम्यहम् ॥३॥
इमं तंडुल - मय पिंड घृत - मधु समन्वितम्।
ददाय तस्मै प्रेताय सर्व पापोध्दरं ध्रुव ॥४॥

अनिर्दिष्ट गोत्र अनिर्दिष्ट सापेक्षिक मम वंशे - शरीरे - गृहे पीडा बाधाप शमनार्थं अयं तंडुल मय पिंडं ब्रह्मणे उपतिष्ठताम् ॥१॥ यवमयं पिंडं गृहीत्वा ---

ये केचित् वायुरूपेण वर्तंते पितरो मम।
यवपिंड प्रदानेन् व्र जंतु गति मुत्तमां ॥२॥

आब्रह्मणो ये पितृवंश जाता मातुः स्तथा वंश भवा मदियाः। वंश द्वयोस्मि मम दास भूता भृत्या स्तथैवाश्रित सेवकाश्च ॥ मित्राणि सख्यः पशवश्च शिष्या दृष्टाश्च पुष्टाश्च कृतोपकाराः। जन्मांतरे ये मम संगताश्च तेभ्यः सदा पिंड महं ददामि ॥ अग्नि दग्धाश्च ये केचिन्नाग्नि दग्धा स्तथा परे। तेषां उध्दारणार्थाय इमं पिंडं ददाम्यहम् ॥ यव पिंड मयं पिंडं मधुघृत समन्वितम्। ददामि तस्मै प्रेताय सर्व पापोध्दरं ध्रुव ॥ अंतरिक्षे ये जाता राजसा वायु रूपिणः। राजस पिंड प्रदानेन ते तृप्यंतु मुदान्विताः ॥

अनिर्दिष्ट गोत्र अनिर्दिष्ट सापेक्षिक विष्णु शर्मन् राजस रूप एष ते पिंडं उपतिष्ठतु॥२॥

३) तिलमय पिंडं गृहीत्वा -

ये केचित् मृता येता भूमौ तिष्ठंति सर्वदा। ददामि तस्मै प्रेताय सर्व पापोत् भवाय च !! तिलमय पिंड दानेन् तृप्तिं यांतु क्षुधार्दिताः। तेषां उध्दारणार्थाय इमं पिंडं ददाम्यहम् ॥ पितृ मातृ स्वसारश्च स्वसुताश्च सुरास्तथा। रौरवे यांधते मिश्रे काल सूत्रे च ये गता : ॥



Scanned by CamScanner

## ।। पिंड दानम् ।।

असिपत्र वने घोरे कुंभी पाके च ये गता: । अथवा वृक्ष योनिस्या पक्षी कीट सरिसृपा : ।। भूत प्रेत पिशाचाश्च श्वान, योनि च ये गता: । इमं तिलमय पिंडं मधु सर्पि समन्वितम् ।। ददाय तस्मै प्रेताय प्रेत मोक्ष प्रदो भव ।। सर्वे मृता तमो गुणा सर्वोपद्रव नाशन: । तेषां पिंडो मया दत्तो अक्षय्यं उपतिष्ठतु ।। अनि० गो० अनि० सापे०रुद्र शर्मन् तामस रुप एष ते तिलमय पिंडं उपतिष्ठतु ।।३।। निविं विसृज्य ।। नमो व:इति षडंजलीं कुर्यात् ।।

१) नमो व: पितरो रसाय० २) नमो व: पितर:शोषाय ०

३) नमो व: पितरो जीवाय० ४)नमो व: पितर: स्वधायै ०

५)नमो व:पितरो घोराय ० ६) नमो व: पितरो मन्यवे ०

अत्रउदंग् मुखं श्वासं नियम्य पुनरावृत्य प्रति पिंडं --

ॐ नमो व: पितर: पितरो व्वास: आधत्त ।। एत व्द: पितरो व्वास: ।।इति ।।

सव्यं - पिंड पूजां करिष्ये -पिंड संस्था: पितर: अत्रं स्वधा नम: । गंधं नम:।यव-तिलाक्षतॉं स्वधा नम:।तुलसीदलानि स्व०न०।धूपं स्व०न०। दीपं स्व०न०। नैवेद्यं स्व०न०। फल मुखवास तांबूल सदक्षिणाकं स्व०न०। नीरांजनं स्व ०न०। पुष्पांजलिं स्व०न०।।**सर्वैसह पिंडान् नमस्कृत्य०** पिंडस्यार्चन विधे: परिपूर्णतास्तु ।अस्तु परिपूर्णताम् ।। **अपसव्यं ----**

## ।। चटोपरि सुप्रोक्षिकादि करणम् ।।

शिवा आप: सन्तु-सन्तु शिवाप:। सौमनस्यमस्तु-अस्तु सौमनस्यम् । अक्षतं चारिष्टं चास्तु-अस्त्वक्षतमरिष्टं च । भो: पितर:स्वधोच्यताम्-अस्तु स्वधा ।।पिंडमूले तिलोदकं निषिंचेत् -ॐऊर्जं व्हहन्ति० इति मंत्रेण० ।।

१)मातुलिंगं २)खर्जूर ३)नारिंगं धृत्वा अर्घ-त्रय दधात् ।।

अनेन त्रिपिंडी श्राध्दाख्येन भगवान् ब्रम्ह-विष्णु-रुद्र: प्रीयताम् ।।

पिंडदाने परिपूर्णतास्तु ०।।

॥ पिंडोपरि सुप्रोक्षिकादि करणम् ॥ अपसव्यं-

१)अनि०गोत्रस्य अनि०सापे०ब्रह्म शर्मणे सात्विक रूप।

२)अनि०गोत्रस्य अनि०सापे०विष्णु शर्मणे राजस रूप।

३) अनि०गोत्रस्य अनि०सापे०रूद्र शर्मणे तामस रूप।

दत्त श्राध्द मन्नं, उदकं अक्षय्य मस्तु ॥ इति सुप्रोक्षित करणम् ॥ पात्र मुत्तानं कृत्वा ॥

भू दक्षिणां दद्यात् ॥

अस्य श्राध्दस्य फलप्राप्ति कामस्य-

१) ब्रह्म शर्मणे-सात्विक रूपाय-अक्षय्य मस्तु स्वधोच्यताम् ॥

२) विष्णु शर्मणे-राजस रूपाय-अक्षय्य मस्तु स्वधोच्यताम् ॥

३) रूद्र शर्मणे-तामस रूपाय-अक्षय्य मस्तु स्वधोच्यताम् ॥

सव्यं- त्रिपिंडी श्राध्दं संपन्नं सुसंपन्नम् ॥

प्रार्थयेत्-

दिव्यन्तरिक्ष भूमिस्या सात्विका राजसास्तथा।
तामसा प्रेत रूपाश्च शांतिं गच्छंतु हर्षिताः ॥१॥
ईशान विष्णु कमलासन कार्तिकेय।
वन्हित्रयार्क रजनीश गणेश्वराणाम् ॥
क्रौंचा मरेंद्र कलशोद्भव कश्यपानाम्।
पादान्नमामि सततं मम पितृ-मुक्ति हेतोः ॥२॥
अयोध्या मथुरा माया काशी कांची अवंतिका।
पुरी द्वारावतीश्चैव सप्तैता मोक्षदायकाः ॥३॥ सव्यं-

पिंडं उधृत्य, आघ्राय। पुनः स्थाप्य। रस्मृतां अभिरम्यतास्य ॥ संकल्प- शुभ पु०ति०ममात्मना०अमु०मासे-अमु०पक्षे-अमु०ऋतौ-अमु०तिथौ - अमु०वासरे-अपसव्यं- अनिर्दिष्ट गोत्राणां अनिर्दिष्ट सापेक्षिकानां ब्रह्म-विष्णु-रूद्र शर्मणां सत्व-रज-तमो रूपाणां एक तंत्रेण एकोद्दिष्ट विधिना त्रिपिंडी श्राध्दं विधेयं न्यूनातिरिक्तं ब्राह्मण वचनात् श्री महा विष्णोः प्रसादात् तत्सर्वं परिपूर्णतास्तु ॥ अस्तु परिपूर्णताम् ॥



Scanned by CamScanner

स्नानं कृत्वा- सव्यं- आचमनं कृत्वा-वस्त्र परिधानं। गंधादि लेपनं। गणपति पूजनं-पुण्याह वाचनम्। यजमानाभिषेकं कृत्वा। ब्राह्मणेभ्यो दक्षिणादानम्। घटदानं-मूर्ति-कलश-वस्त्रदानं। आशीष ग्रहणम्। नमस्कारं कृत्वा ॥ देवालये दीपं प्रज्वाल्य ॥ यस्य स्मृत्या०॥ ॐ तत्सद् ब्रह्मार्पणमस्तु ॥

१) शंखोदकेन श्री महाविष्णु तर्पणम्-ताम्रपात्रे- जल-दुग्ध-सर्वौषधी-तिल-तुलसि-चंदनं प्रक्षिप्य। शंखोदकेन् तर्पणं कुर्यात् ॥

१) केशव स्तृप्यतु० २) नारायण स्तृ० ३) माधव स्तृ० ४) गोविंद स्तृ०
५) विष्णु स्तृ० ६) मधुसूधन स्तृ० ७) त्रिविक्रम स्तृ० ८) वामन स्तृ०
९) श्रीधर स्तृ० १०) ऋषिकेश स्तृ० ११) प्रद्युम्न स्तृ० १२) दामोदर स्तृ०

॥ अथ ध्यानम् ॥ ॐ शांताकारम् भुजग शयनं०॥१॥

जयत्वं देव देवेश यम धर्म नराक्षर।
जय कामद भक्तानां महाविष्णु नमोस्तुते ॥२॥
अच्युतानंत देवेश अगतिनां गतिर्भव।
संसारार्णव मग्नानां त्राहिमां तु जनार्दन ॥३॥ अपसव्यं-

गोत्रा: अस्मत्कुले अनिर्दिष्ट सापेक्षिका: सात्विक-राजस-तामस रूपा: परलोके महातृषा निवृत्तये इदमुदकं अक्षय्यं उपतिष्टतांम् ॥ ब्रह्म-विष्णु-रूद्र देवतानां तर्पण विधे: परिपूर्णतास्तु ॥ अस्तु परिपूर्णताम् ॥ नमस्कार:-

अनादि निधनो देव शंख चक्रधर: प्रभु।
अक्षय्य पुंडरीकाक्ष प्रेत मोक्ष प्रदो भव ॥१॥
कृष्ण कृष्णेति ये मां नरा: स्मरन्ति नित्यश:।
जलं पीत्वा यथा पद्मं नरकात् उध्दराम्यहम् ॥२॥

॥ इति प्रार्थना ॥

॥ सव्यं-आचमनम् ॥



Scanned by CamScanner

# दशविध दानम्

१) गोदान २) कमंडलु ३) तिलपात्र ४) घृतपात्र ५) कास्यपात्र

६) उपानह ७) छत्र ८) वस्त्र ९) सुवर्ण १०) दक्षिणा

विष्णवे वस्त्र दानं च। ब्रह्मणेषु कमंडलु ॥
उपानह दानं रूद्राय। ब्राह्मणेतु सुवर्णकम् ॥१॥
इदं दशदानानि दधात्। यथा शास्त्र प्रमाणकम्।
तद् भावे निष्क्रयी भूतं। दक्षिणां दातु श्रध्दया ॥२॥
पितृ–मात्रादि दैवतम्। ब्रह्म–विष्णु–हर: समम्।
दश दानेन भवेत् तृप्तम्। यावश्चंद्र दिवाकरौ ॥३॥
सुपुत्रो उध्दरेत् तस्य। दानेन पितरे न च।
तस्मात् दानं प्रयच्छामि। पितृ मोक्षाय कारणात् ॥४॥

॥ पंच वाक्यात्मक पुण्याह वाचनम् ॥

भो ब्राह्मणा:, मह्यं सह कुटूंबिने महाजनान् नमस्कुर्वाणाय आशिर्वचनं अपेक्ष माणाय अद्य करिष्यमान-- ''त्रिपिंडी श्राध्दाख्यस्य कर्मण:'' –

पुण्याहं भवन्तो ब्रुवन्तु। कल्याणं भवंतो ब्रुवंतु ॥
ऋध्दिं भवंतु ब्रुवंतु। स्वस्तिं भवंतो ब्रुवंतु ॥
श्री:अस्त्विति भवंतो ब्रुवंतु०॥

॥ इति सांकल्पिक पुण्याह वाचनम् ॥



Scanned by CamScanner